चरितःसिद्धगंधर्वचारणैः २५ एवंभृगुषुविश्वात्माभगवान्हरिरीश्वरः अवतीर्यपरंभारंभुवोहन २७ व
हुशोन्नृपान २६ गाधेरभून्महातेजाःसमिद्धइवपावकः तपसाक्षात्रमुत्सृज्ययोलेभेब्रह्मवर्चसं
विश्वामित्रस्यचैवासन्पुत्राएकशतंनृप मध्यमस्तुमधुच्छंदामधुच्छंदसएवते २८ ॥ राम

शतंज्यायांसोमधुच्छंदसःपंचाशत्कनीयांसःशुनःशेपंचविश्वामित्रपुत्रंभार्गवस्याजीगर्तस्यदेवरात
संज्ञंपुत्रमवगम्य तथाआश्वलायनबौधायनादिभिः कौशिकानांदेवरातप्रवरत्वमुक्तंप्रवरत्वेतस्मिन
नेवर्वेणप्रयोनरभेदःत्रवंशांतरेतथाचस्मृतिः एकएवऋषिर्यावत्प्रवरेष्वनुवर्तते तावत्समानगोत्रत्वं
विनाभृग्वंगिरोगणादिति २८ ॥ राम ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भा॰ नं॰ टी॰ ३४

तत्कृतोऽभृगुवंशोभवत्स देवरातस्य कौशिकप्रवरत्वमित्याशंक्य तत्प्रपञ्चयन्नाह पुत्रेकृत्वेत्यादिनायाव
त्समाप्तिपूर्वं मजीगर्तसुतेनेव मध्यमतेनपित्रा स्वयमेव मन्तोविहाय विक्रीतत्वात्तस्य कृपयासुतानामहोत्स्वेष
ज्येष्ठएव प्रकल्प्यतामिति ३३ एतद्देवस्य हि पितेविविधानष्टियःशनिद्वाभ्यां मुमुचेप्रमुच्यत ३४ भार्गवो
पिगाधिषु गाधिवंशजेषु देवरात इति विख्यातः ३५ ततस्तस्य ज्येष्ठत्वं कौशलेन मतिरमध्यमस्यानथा

पुत्रेकृत्वाशुनःशेपं देवरातेच भार्गवे आजीगर्तेसुतानाहज्येष्ठएवप्रकल्प्यतां २९ योवैह
रिश्चन्द्रमखेविक्रीतः पुरुषः पशुः स्तुत्वादेवान्प्रजेशादीन्मुमुचे पाशबन्धनात् ३० योरा
तोदेवयजनेदेवैर्गाधिषुतापसः देवरातइतिख्यातःशुनःशेपस्तुभार्गवः ३१ येमधु
च्छन्दसोज्येष्ठाः कुशलंमेनिरेनतं अशपत्तान्मुनिःक्रुद्धोम्लेच्छाभवतदुर्जनाः ३२ सहोवा
चमधुच्छन्दाःसार्द्धंपञ्चाशताततः यन्नोभवान्संजानीतेतस्मिंस्तिष्ठामहेवयं ३३ ज्येष्ठंम
न्त्रदृशंचक्रुःत्वामन्वञ्चोवयंस्महि विश्वामित्रःसुतानाहवीरवन्तोभविष्यथ येमानं
मेनुगृह्णन्तोवीरवन्तमकर्तमां ३४ ॥ राम ३५
वदत्वंदशानांगीकृ वंतः सुनिर्विश्वामित्रः

पञ्चशतानांकनिष्ठैः साकंसमध्यमोमधुच्छन्दाउवाच नास्माकंयतज्ज्येष्ठत्वंकरिष्यत्वाभवान्पितासंजा
नीतेमन्यतेतस्मिंस्तिष्ठामहेति ३३ एवमुक्त्वामन्त्रदृशंकस्तन्नेकृतमस्यान्तानामित्यादिमन्त्राणां
द्रष्टारंशुनःशेपंज्येष्ठंचक्रुः तदाहवयंसर्वेत्वामन्वञ्चः स्महिश्रनुगतारः कनिष्ठाःस्मइत्यर्थः ततःप्रसन्नो
विश्वामित्रःतान्सुतानाहवीरवन्तःपुत्रवन्तोभविष्यथयेयूयंमेमानंरक्ष्यतामनुगृह्णानःशुनवन्तमां

हे कौशिकाः एष देवरातः वो युष्माकं दीपः कौशिक एव यतः वीरो मत्पुत्रः तमेनमनुमतिं तमनुगच्छत अन्ये चाष्टको
दयः सुतस्सुतस्माप्रसन ३५ उपसंहरति एवमिति एके शताः एके अनुगृहीताः अन्यत्तु पुत्रेणते नस्वीकृतत्स्येवं कौशि
कगोत्रं पृथग्विधं नानाप्रकारं जातं तस्य प्रकारान्तरमापन्नं प्राप्तं हि यस्मादेवं देवरातमेष्ठेन तत्प्रकल्पिते ३६ इ
तिनवमस्कंधेषोडशः १६ एवं च कौशिकानां वीरोऽसुरापोः सन्नद्रदशात्त्वलम्भे षट्पुत्रस्य पंचमस्यान्वयः तत्र रुद्धादि

एषवं कौशिकानां वीरोदेवरातस्तस्य मन्तिन अन्येचाष्टकहारीतजयक्रतुमदादयः एवं कौशिकगोत्रं
तु विश्वामित्रैः पृथग्विधं प्रवरान्तरमापन्नं तद्द्विधैव विकल्पिते ३६ इति श्रीभागवते नवमस्कं
धे षोडशोऽध्यायः १६ शुकः यः पुरूरवसः पुत्र आयुस्तस्याभवन्सुताः नहुषः क्षत्रवृद्धश्च रजी रंभश्च
वीर्यवान् अनेना इति राजेंद्र शृणु क्षत्रवृद्धान्वयं १ क्षत्रवृद्धसुतस्यासन्सुहोत्रस्यात्मजास्त्रयः
काश्यः कुशो गृत्समद इति गृत्समदादभूत् २ शुनकः शौनको यस्य बह्वृचप्रवरो मुनिः काश्यस्य
काशिस्तत्पुत्रो राष्ट्रो दीर्घतमःपिता धन्वन्तरिर्दीर्घतमस आयुर्वेदप्रवर्तकः ३ यज्ञभुग्वासुदेवां
शः स्मृतमात्रार्तिनाशनः तत्पुत्रः केतुमानस्य जज्ञे भीमरथस्ततः ४ दिवोदासो द्युमांस्तस्मात्प्रत
र्दन इति स्मृतः स एव शत्रुजिद्वत्स ऋतध्वज इतीरितः तथा कुवलयाश्वेति प्रोक्तोऽलर्कादयस्त

चतुर्णां वंशावर्णनं ३ ह श्रीकृष्णावतारप्रस्तावाय वंशानुक्रमेण एलादिक्रमेणाक्रान्तं अतिप्रसंगशं कृष्णा।
वतारस्य वंशानि विततनत्वादेते निरूप्यते अतः पुरूरवसः पुत्राणां पंचानां कनिष्ठानां वंशानुक्रमेणादौ नीप्रथम
स्य वंशमाहस्यद्गति एवं वह्नुषधयाति यद्वप्रमस्तिष्ठ पिदृष्टव्यं तत्र क्षत्रवृद्धः क्षत्रवृद्धस्य दीर्घतमसः पिता ४ स्मृ
तमात्रं एव आर्तिरोगदुःखं विनाशयतीति तथा ५ ततः प्रतर्दनादिशब्दैर्वा आत्मप्रमतः सकाशात् अलर्कादयः

35

श्री भा न टी ३५

संततिसंज्ञः सत्यकेतोर्धृष्टकेतुस्तस्मात्सुकुमारः तस्माद्वीतिहोत्रः तस्य भर्गः अतो भर्गाद्भार्गभूमिः काशयः ।
काश्यवंश्याः काशेः पुत्रिनामहस्य तत्रवृद्धान्वये पतेयानीतितस्याननस्यानेनसः शुद्धोजातः तेन कृतकृत्यः स

षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च नालर्कादपरो राजन्नबुभुजे मेदिनीं युवा ६ अलर्का
त्संततिस्तस्मात्सुनीथोथ निकेतनः धर्मकेतुः सुतस्तस्मात्सत्यकेतुरजायत ७ धृष्टकेतुस्ततस्त
स्मात्सुकुमारः क्षितीश्वरः वीतिहोत्रस्य भर्गोतो भार्गभूमिरभून्नृप इतीमे काशयो भूपाः क्षत्रवृद्धा
न्वयायिनः ८ राभस्य रभसः पुत्रो गंभीरश्चाक्रियस्ततः तद्गोत्रं ब्रह्मविज्जज्ञे शृणु वंशमनेनसः ९
शुद्धस्ततः शुचिस्तस्माच्चित्रकृद्धर्मसारथिः ततः शांतरजो जज्ञे कृतकृत्यः स आत्मवान् १० रजेः
पंचशतान्यासन्पुत्राणाममितौजसां देवैरभ्यर्थितो दैत्यान्हत्वेंद्रायाददाद्दिवं ११ इंद्रस्तस्मै पुनर्दत्वा
गृहीत्वा चरणौ रजेः आत्मानमर्पयामास प्रह्लादाद्यरिशंकितः १२ पितर्युपरते पुत्रा याचमानाय
नो ददुः त्रिविष्टपं महेंद्राय यज्ञभागान्समाददुः १३ गुरुणा हूयमानेग्नौ बलभित्तनयान्रजेः अ
वधीद्भ्रंशितान्मार्गान्न कश्चिदवशेषितः १४ कुशात्प्रतिः क्षात्रवृद्धात्संजयस्तत्सुतो जयः ततः कृ
तः कृतस्यापि जज्ञे हर्यवनो नृपः १५ सहदेवस्ततो हीनो जयसेनस्तु तत्सुतः १६ संकृतिस्तस्य
जयः क्षत्रधर्मा महारथः क्षत्रवृद्धान्वया भूपाः शृणु वंशं च नाहुषं १७ इति श्रीभागवते नवम
स्कंधे सप्तदशोऽध्यायः १७ ॥

यतः आत्मवान् ज्ञानी अतः पुत्रोन्याददेन न कृतवानित्यर्थः तेषां मतिभ्रं
शाय गुरुणा बृहस्पतिना अभिचारविधानेनाग्नौ हूयमाने सति १४ सिंहावलोकनेनाह क्षत्रवृद्धान्वया
न्क्षत्रवृद्धपुत्रान् कुशात्प्रतिः प्रतेः संजयः १५ इति श्रीभावार्थे नवमस्कंधे सप्तदशोऽध्यायः १७ ॥ ३५

35A

अश्रुतदेशेयपायानेस्त्वनाहुषस्यकथोच्यते यस्यपंचसुपुत्रेषुकनीयानग्रहीन्नरो तस्यराज्यस्यपरिणाममन
यावहनेवेनीनिनयातत्रदेतःयेवेति २ स्थानातवर्गातद्विजेरगस्त्यादिभिः ३ यवीयसोभ्रातृनाहिशन
काव्यस्यपुत्रस्यन्हषपर्वणकन्याभ्यांकृतदारःसन ४ तत्रप्रतिलोमतादोषः ईश्वरस्वेच्छनाहितिदर्शयन
शुकउवाच यतिर्ययातिःसंयातिरायतिर्वियतिःकृतिः षडिमेनहुषस्यासन्निंद्रियाणीवदेहिनः १
राज्यंनेछ्द्यतिःपित्रादत्तंतत्परिणामवित यत्रप्रविष्टःपुरुषआत्मानंनावबुध्यते २ पितरिभ्रंशि
तेस्थानादिंद्राण्याधर्षणाद्विजेः प्रापितेजगरत्वंवैययातिरभवन्नृपः ३ चतसृष्वादिशदिक्षुभ्रा
तृनभ्रातायवीयसः कृतदारोजगोपोर्वीकाव्यस्यवृषपर्वणः ४ राजोवाच ब्रह्मर्षिर्भगवान्काव्यः
क्षत्रबंधुश्चनाहुषः राजन्यविप्रयोःकस्माद्विवाहःप्रतिलोमकः शुकउवाच एकदादानवेंद्रस्य
शर्मिष्ठानामकन्यका सखीसहस्रसंयुक्तागुरुपुत्र्याचभामिनी ६ देवयान्यापुरोद्यानेपुष्पित घ
द्रुमसंकुलेव्यचरत्कलगीतालिनलिनीपुलिनेवला ७ ताजलाशयमासाद्यकन्याःकमललोचनाः
तीरेन्यस्यदुकूलानिविजह्रुःसिंचतीमिथः ८ वीक्ष्यव्रजंतंगिरिशंसहदेव्यावृषस्थितं सहसोत्तीर्य
वासांसिपर्यधुर्व्रीडिताःस्त्रियः ९ शर्मिष्ठाजानतीवासोगुरुपुत्र्याःसमव्ययत स्वीयंमत्वाप्रकुपि
तादेवयानीदमब्रवीत १० अहोनिरीक्षतामस्याःदास्याकर्मह्यसांप्रतं अस्मद्धार्यंधृतवतीशु
नीवहविरध्वरे ११ ॥

कथामाह एकदेत्यादिनाप्रतिग्रहेनतद्वंशस्यपतनगरोःशुक्रस्यपुत्र्यादेवयान्या।
चशर्मिष्ठयोरन्वयः ६ कलगीतायअलयोयेषुतानिनलिनीपुलिनायस्मिनपुरोद्यानेअवलाशर्मिष्ठा ७
सिंचतीःसिंचन्त्यः ८ अजानतीसवर्णमत्वागुरुपुत्र्यावासःसमव्ययतपर्यधत १० असांप्रतमन्याय्यं ११ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

36

श्री· भा· न· टी· ३५

अन्याय्यमेवब्राह्मणोत्कर्षवर्णनेनलब्धनक्षिपतीतित्रिभिः येब्राह्मणाःपरस्यपुंसोमुखंतेषुयोस्तपसानेनतपसानिद्धारेतेनव
ब्रह्मैवधार्यतेज्योतिर्वेदमयंपन्थावेदमार्गः १२ तदेवंब्राह्मणमात्रंभवतांवन्द्यंतत्रापिवयंभृगवः अस्माकंपिता
नःशिष्यःएवमप्यस्माभिर्धार्यंवासःधृतवती १४ निषिद्धाचरणंप्रतिलोमसंबन्धइतिचेत्तत्राहहस्तग्राहइति २१

यैरिदंतपसासृष्टंमुखंपुंसःपरस्यये धार्यतेयैरिहज्योतिःशिवःपन्थाःप्रदर्शितः १२ यान्वन्दन्त्युपतिष्ठन्ते
लोकनाथाःसुरेश्वराः भगवानपिविश्वात्मापावनःश्रीनिकेतनः १३ वयंतत्रापिभृगवःशिष्यो
(नः) स्यापितासुरः अस्मद्धार्यंधृतवतीशूद्रोवेदमिवासती १४ एवंक्षिपन्तींशर्मिष्ठागुरुपुत्रीमभाषत रुषा
श्वसन्त्युरंगीवधर्षितादष्टदच्छदा १५ आत्मवृत्तमविज्ञायकत्थसेबहुभिक्षुकि किंनप्रतीक्षसेऽस्माकं
गृहान्बलिभुजोयथा १६ एवंविधैःसुपरुषैःक्षिप्त्वाचार्यसुतांसती शर्मिष्ठाप्राक्षिपत्कूपेवासश्चादा
यमन्युना १७ तस्यांगतायांस्वगृहंययातिर्मृगयांचरन् प्राप्तोयदृच्छयाकूपेजलार्थीतांददर्शह १८
दत्त्वास्वमुत्तरंवासस्तस्यैराजाविवाससे गृहीत्वापाणिनापाणिमुज्जहारदयापरः १९ तंवीरमाहौ
शनसीप्रेमनिर्भरयागिरा राजंस्त्वयागृहीतोमेपाणिःपरपुरंजय २० हस्तग्राहोऽपरोमाभूद्गृहीता
यास्त्वयाहिमे एषईशकृतोवीरसंबन्धोनौनपौरुषः २१ यदिदंकूपमग्नायाभवतोदर्शनंमम नब्राह्म
णोमेभविताहस्तग्राहोमहाभुज कचस्यबार्हस्पत्यस्यशापाद्यमशपंपुरा २२ ॥ राम ॥

ब्राह्मणमेववरयेत्याह हि किमनेनाग्रहेणेतिचेत्तत्राह नब्राह्मणइति बृहस्पतेःसुतःकचःशुक्रात्संजीवनी
मध्यगात्तदाचेद्देवयानीतंपतिंचकमे सचगुरुपुत्रीममस्येतिनतामुद्वहत् ततःशुक्रपितासती ३५
तंविविद्येयंतेनिष्फलाभवत्वितितंशशाप सचतवब्राह्मणःपतिर्नभवेदितितांशशापतदेवंतदाहयमहमशपं

३६१७

ग्रशोकोपवनात्पनभिप्रेतमपि दैवेनोपस्मृतं प्राप्य तं वृद्धानरूं तेनस्यांस कामं संमनश्च वृद्धानस्य यमेमयीयेमनः प्र
विशेद्दिनितस्या वचः प्रतीजग्राहद्भ्रंशीकृतवान शर्मिष्ठां संवेपोपि दैववशाद्देवा भवद्धिन्नदर्शायन्नाहगतेराजनी
तिनवर्मिः ३ क्रोभितकोस्मारिङ्कृतेयोन्वेषा दिकापोतीमृच्छहति २५ प्रत्यनीकाद्देवात्तैर्विवर्तिताः जयप्राप।

यथानिरुक्तमभिप्रेतं दैवोपसृतमात्मनः मनस्तत्फलं वृद्धा प्रतिजग्राह तद्वचः २३ गते राजनि सर्वीरेत
उत्सृष्टती पितुः न्यवेदयत्ततः सर्वं स्वकेशर्मिष्ठया कृतं २४ दुर्मना भगवान्काव्यः पौरोहित्ये वि
गर्हयन् स्तवन्नन्निश्चक्राप [illegible] नीदुहित्रा समयपोश्ररान २५ वृषपर्वाणमाज्ञाय
प्रत्यनीकविवर्तितं गुरुं प्रसादयन्काम्यां पादस्पोः पतितः पथि २६ क्षणार्द्धमन्युर्भगवान्शिष्यं।
व्याचष्ट भार्गवः कामोस्याः क्रियतां राजन्नैनांत्यक्तुमिहोत्सहे २७ तथेत्यवस्थिते प्राहदेवयानी
मनोगतं पित्रादत्ता यतो यास्ये सानुगा यातु मामनु २८ स्वानां तत्संकटं वीक्ष्य तदर्थस्य च गौरवं
देवयानीं पर्यचरत्स्त्रीसहस्रेण दासवत् २९ नाहुषाय सुतां दत्त्वा सह शर्मिष्ठया माधात्तलेनकः।
ह्दिविन ३० विलोक्यौशनसी राजन् शर्मिष्ठा प्रजां क्वचित् तमेव वव्रे रहसि सख्याः पतिमृतौ सती।
ती ३१ राजपुत्र्यार्थितोपत्ये धर्मं चावेक्ष्य धर्मवित् स्मरन्शुक्रवचः काले दिष्टमेवाभ्यपद्यत ३२

[illegible]ष्टयोपृष्ठाना: तमाहराजन्शर्म्मि

॥ ॥ ॥

लोयाऽस्पभिप्रेते यस्पतथाभूतेनात्माप्रत्यनीकानां विवर्तितमितिवा २५ सानुगामावीसहिता शर्मि
ष्ठामात्मवयानितित २७ ततस्मान्निर्गतानश्चकांसंकटं वीक्ष्य २८ ततस्मादवस्थितादर्थस्य प्रयोजनस्य गौ
रवीक्ष्य २९ तल्पेमाधाः तोपगच्छेऽर्थः ३० अपत्यार्थमृतकाले प्रार्थनातस्याः कामश्शरणं धर्ममवेक्ष्य

२६ [illegible]

श्री
भाग
दी
३

आसुर्याः शर्मिष्ठायाः भर्तुः सकाशात् उपमंत्रयत प्रसादयत विख्यातं तं रूपं करोमि तथा ते दुहितरि कामैर्याप्यस्त्रैसि।
कामानां भोगरीति वा पुरु आहूतं हि यो भिधास्यति प्रभुता पार्थिव्यं नियतास्य तेनोपयच्छे जरायाः स्वयं नीयता
मिति वा पद्धा अन्यस्यो निकेतः तानं तं यत्नात् संगमयेत्प्रयः इति लब्ध अवस्थानं जरायाः अवस्थितिं यं नमःय।
पदं च उवं सुचैव देवयानी अजापत दुह्यं चानुं च शरुं च शर्मिष्ठा वार्षपर्वणी ३३ गर्भसंभवमाज्ञायाभ
तं विज्ञाय मानिनी देवयानी पितुर्गेहं ययौ क्रोधविमूर्छिता ३४ प्रियामनुगतः कामी वचोभिरुप
मंत्रयन् नप्रसादयितुं शोकेपादसंवाहनादिभिः ३५ शुक्रस्तमाह कुपितः स्त्रीकामानृतपूरुष त्वां
का ५ जराविशतां मंद विरूपकरणी नृणां ३६ ययातिरुवाच अतृप्तोस्म्यद्य कामानां ब्रह्मन् दुहितरिस्मते ३७ शुक्र
व्यत्यस्यतां यथाकामं वयसा योभिधास्यति इति लब्धव्यवस्थानः पुत्रं ज्येष्ठमयाचत ३८ यदो तात प्रती
च्छेमां जरां देहि निजं वयः मातामहकृतां वत्स न तृप्तो विषयेष्वहं ३९ वयसा भवदीयेन रंस्ये कतिप
याः समाः यदुरुवाच नोत्सहे जरया स्थातुमंतरा प्राप्तया तव ४० अविदित्वा सुखं ग्राम्यं वैतृष्ण्यं नैति
पूरुषः तुर्वसुश्चोदितः पित्रा द्रुह्युश्चानुश्च भारत ४१ प्रत्याचख्युरधर्मज्ञा ह्यनित्ये नित्यबुद्धयः ४१
अपृच्छत्तनयं पुरुं वयसोनं गुणाधिकं न त्वमग्रजवत्वत्स मां प्रत्याख्यातुमर्हसि ४२ पुरुरुवाच।
को नु लोके मनुष्येंद्र पितुरात्मकृतः पुमान् प्रतिकर्तुं क्षमो यस्य प्रसादाद्विंदते परं ४३ उत्तमः
चिंतितं कुर्यात् प्रोक्तकारी च मध्यमः अधमो श्रद्धया कुर्यादकर्ता उच्चरितं पितुः ४४ ॥ राम

तोधर्मकर्ता अनित्ये चयौवने नित्यबुद्धयः ४१ तं जरां किं गृहीष्यसि इत्यपृच्छत् प्रत्याख्यानं माकुर्यादित्याह त
त्वमिति आत्मकृतः स्वदेहकर्तुः प्रत्युपकारं कर्तुं को नु क्षमः तथापि पितुर्यच्चिंतितं तत्कुर्यात्स उत्तमः यस्तु प्रो
क्तकारी स मध्यमः यस्त्वश्रद्धया कुर्यात्सोधमः अकर्ता पितुरुच्चरितं पुरीषवत् ४४ ॥ राम राम ३०

37

नेनयेसेविनवान् ५७ यथोपजोषेयथाप्रीतिस्तन्नृपे ४९ नानेवभातिघावद्दिंद्दिघप्रवृत्तिः तद्वपरमेनाभा।
तिसद्भमायाभ्यांसहितोमनोरथस्वेत्यर्थः ५० मनःसर्वकामभोगेकद्दिंद्दिघेः ज्ञात्वितेः प्रापूर्वीवि
वा द्विधेः ५१ इतिश्रीनवमेः द्वादशः ऊनविंशेययातिस्तुचहितेनवेजायमेदेवयानीसमाप्राव्यविरक्तानु।
क्तिमप्रवान भक्तभोगामजोहास्यत्तनवद्गून्नमात्मनः विरुवयनुपामाहृतिर्वेद्यितमात्मवान कैसा
इतिप्रमदितः प्रकः प्रत्यनरहणाज्ञापितः सोपितद्रूपसाकान्यथावज्जनेषन्त्य ५४ सप्रडी।
यवतीसम्यकुपित्स्वत्यालयत्यजाः यथोपजोषविषयानजनृषेत्याहृतेद्दिघः ५५ देवया
न्यप्यनरुक्तिनमनोवाकदेहवस्तुभिः प्रेयसःपरमोप्रीतिमुवाहप्रेयसीरहः ५७ अयजघज्ञ
पुरुषंकृतुभिर्भूरिदक्षिणैः सर्वदेवमयंदेवंसर्वदेवमयंहरिं ४९ यस्मिन्निदंविरचितंव्योम।
श्रीवत्सजलदावलिः नानेवभातिनाभातिसद्भमायामनोरथः ४९ तमेवहृदिविन्यस्यवा।
सुदेवंगुहाशयं नारायणमणीयांसंनिराशीरयजत्प्रभुं ५० एवंवर्षसहस्राणिमनःषष्ठैर्मनः
सुखं विदधानोपिनात्मप्यत्सार्वभौमः कदिंद्दिघः ५१ इतिश्रीभागवतेनवमस्कंधेः द्वादशः १९
शुकः उवाच स एवमाचरनकामान्स्त्रैणोपह्नवमात्मनः बुद्धाप्रियायैनिर्विण्णोगाथामेतामगा
यत १ शृणुभार्गवमूं गाथांमद्विधाचरितंवनेग्रामनिवासिनः २ वस्तएकोवनेकश्चिद्विवि
नाचरन्नुपमुञ्जन्मनः गाथामितिद्दासे । मद्विधेनमत्सदृशेनाचरितातपनश्छितांमद्विपस्याचरितेयस्मा।
मितिवायस्यग्रामनिवासिनः कामिनोमद्विपस्याचरितेवनेस्थिताःधीराःशोचंतितस्यगाथांशृणु २।
आत्मानमनुलस्याहवस्तःइतिप्रियामनुलस्याह प्रनाभितिवनेसंसानेप्रियोविषये ३ ॥ राम

चरितंभुवि धीरायस्यानुशो ४

श्री
भा न
टी
३१

गोपमितेरेविषाणाग्रेणामृदादिकमहून्तातीर्थेनिर्गमायमार्गंयपद्ये ४ वह्न्यादिनिशामिंश्चापमुखाः काम
पामासुः कोनेप्रतिकाभिनीः पीवानेपृष्ठेश्मश्रुलश्मवहुलेरतिसमर्थमित्यर्थः मीढ्ठांसेरनःसेरक्तेपा।
कोविदस्त्रमिजेश्यनएवमेहि ५ नावबुध्यातेनानवबुध्यते ६ स्वामिनमितिश्रुकाभिप्रायेणाह ८ इदवि

तस्मादुद्धरणोपायंवत्सः कामीविचिंतयत व्यपनतीर्थेनहत्वाविषाणाग्रेणरोपमि ४ सो
ऽपीपक्षपादन्त्रपाणिनमेववकमेकिल तथाभूतेसमद्धीत्सवद्धोजाः कोनकामिनीः ५ पी।
वानेश्मश्रुलेपृष्ठेमीढ्ठांसेयभकोविदे सएकोजात्रुषत्वासोवह्नीनोरतिवर्द्धनः रेमेकामगृह
ग्रस्तयाप्यमानेनावबुध्यते ६ तमेवप्रेष्ठतमपारमभाणमनात्मया विलोक्यकूपसेविश्राम
ध्यहृत्तकमेतत ७ तेतुदृष्ट्वैसुहृद्रूपंकान्तेत्वाणसोऽहदे इन्द्रियारामसत्त्वस्यस्वामिनंदुःखिता
पथा ८ सोपिचानुगतस्त्रेणः कृपणःतांप्रसादितं कुर्वन्निदविदकोव्यनागोत्पादिधिमेयितं ९
तस्यतत्रद्विजः कश्चिदजात्मासोम्यनंदया लेवतेवृषणोभूयः संदध्योपयोगवित् १० संवद्धवृष
णः सोपिह्यजपात्कूपलब्धया कालेवहूनिश्रमद्काममनोयथितृष्यति ११ तथाहं कृपणः
सुभ्रूवस्याप्रेमयंत्रितः आत्मानंनाभिजानामिमोहितलवमायया १२ यत्रस्थितोत्रीढिय
वेद्विरूपप्रभावः स्त्रियः तदुद्रप्रतिमनःप्रीतिप्रेमः कामहृतस्यते १३ नजानतकामः कामानां
आकारेवत्सताभिशादेसंपन्नेप्रसादयितं ९ वृषणमछिन्नतनजया संभोगासमर्थमकरोत मर्थंपव
पुत्राः कामभोगायपयोगवितउपायज्ञः नराभ्यपनरतिशक्तिर्हेदानस्थः १० रूपलब्धयासहकामैःसेव्य
मानेनेतच्छति १२ नवनहिंपुनरपिवदवोविषयाः सेव्यमानेनामनसिप्रीतेभवतिकामोपशाम्यमाहोति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

38

तद्दिंकरा केनोपायेन वा मनसः संशमो प्रीतिः स्यात् यथा कामोपशमः स्यात्तन्ममाह यदेतिषड्डिः
प्रसंगात्स्वभावं रागद्वेषादिवैषम्य १७ दुःखानि नितरां वहन्ती नितयात्ता १८ स्त्रीसन्निधानेन सर्वथा।
त्यान्यन्त्यात्मा त्रिलिङ्गविविक्तं सेवीणो मामनेपस्सः कर्षति १९ ननु तस्मात्त्यागस्यातिदुःकरत्वात्
यदान करुणे भावं सर्वभूतेषु मंगलं तमरेष्वतदा पुंसः सर्वासु वेमयादिशः १७ याडुत्स्यना
द्यमनि भिनीयंतोयानजोघेने तोन्टल्लाद्ःखनिवहो शर्मकोमाड्डुतेन्यजेत १९ मात्रास्वस्रा
दुहित्रा वा नाविविक्तासनो भवेत बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति १७ शर्णावर्षसह
स्रमविषयासेवनो सक्त तथापि चान सवनेत्स्लातेष्टपजायते १८ तस्मादेनामहत्यक्त्वा
ग्रामस्यायाधायमानसं निर्द्वंद्वो निरहंकारः चरिष्यामिस्सो सह १९ द्दष्ट्वा जनमसद्बुद्धाना।
तुध्यायेत्रसंविशेत संसृतिवात्मना पांचतत्रविद्वान्सग्रात्मदृक् २० अस्त्रक्ता नाहूर्याजा
र्यातदीपश्ववेदयः दत्तात्मो तस्संतस्मादादद्देविगतस्पृहः २१ दिशिदक्षिणश्वेत्साद्दुस्ये
दक्षिणानोपदे यतीचात्तवेसेचक्रेउदीच्यामलुमेप्सरे २२ भूमंडलस्य सर्वस्य पृष्ठमहत
मेविभुः अभिषिच्याग्रजोस्तस्य वशेस्थाप्यवनेययो २३ ग्रासेवितेवर्षशतगान्यद्वैग्गेविष
येषमः हाणेचममुचेनोद्देजातपक्षद्ववद्विजः २४ सतत्रनिसंक्तसमस्तसेगग्रात्मातुभू।
कथंत्रह्मणिमनसग्राधानंस्यात्तत्राहद्दष्टमितियोनानुध्यायेत्रसंविशोत्रचापभेजीततत्रद्दष्टु
तपोरनुध्यानादेसग्रात्मद्दक्भवति २२ तस्यपुत्रोवशेस्थापयिता २३ विषयेषु शब्दादिषु ग्रास
वितेषद्दग्गेषरिदृपत्स्वेमम चेतस्यान यद्वा विषयग्रासेवितेसेवाकारिनेपत्ता सिंद्रियाणांवर्गे

39

श्री भा न टी ३९

प्रलोभमेवाहपरिहासमिवेति यद्वा प्रलोभं निष्कृतिमार्गे प्रोत्साहनं मेने २८ कथं समावेश्य तदा हृदम्
इतिनमन्नाह्निभिः समावेश्यतार्थः प्रकोवानमस्करोति २९ इति नवमे एकोनविंशः विंशे पितृप्रसादा
द्राज्ञामनमहोन्नतेः पूरोर्वंशेनतदोष्मतं भरतस्यचतेयशः १ तत्त्वाश्रहंयातेः स्मृतः ३ धर्मसुश्रूसत्ते

सृता गाथा देवयानी मेनं प्रलोभमात्मनः स्त्रीपुंसोः स्नेहवैक्लव्यात्परिहासमिवेरितं २७
सासंनिवासंसुहृदां प्रपायामिवगच्छतां विज्ञायेश्वरतंत्राणां मायाविरचितं प्रभोः सर्वं
त्रसंगमुत्सृज्य स्वप्नौपम्येन भार्गवी कृष्णे मनः समावेश्य व्यधुनोल्लिंगमात्मनः नमस्तुभ्यं
भगवते वासुदेवाय वेधसे सर्वभूताधिवासाय प्रशान्ताय बृहते नमः २९ इति श्रीभागवते न
वमे एकोनविंशः १९ शुकः पूरोर्वंशं प्रवक्ष्यामि यत्र जातोसि भारत यत्र राजर्षयो वंश्या ब्र
ह्मवंश्याश्च जज्ञिरे १ जनमेजयो ह्यभूत्पूरोः प्रचिन्वांस्तत्सुतस्ततः प्रवीरोथ मनस्युर्वै तस्मा
च्चारुपदोभवत् २ तस्य सुद्युरभूत्पुत्रस्तस्माद्बहुगवस्ततः संयातिस्तस्या
हंयाती रौद्राश्वस्तत्सुतः स्मृतः ३ ऋतेयुस्तस्य कक्षेयुः स्थण्डिलेयुः कृतेयुकः जलेयुः सन्न
तेयुश्च धर्मसत्यव्रतेयवः ४ दशैतेप्सरसः पुत्रा वनेयुश्चावमः स्मृतः घृताच्यामिन्द्रियाणीव
मुख्यस्य जगदात्मनः ५ ऋतेयो रन्तिनावोभूत्त्रयस्तस्यात्मजा नृप सुमतिर्ध्रुवोप्रतिरथः क
ण्वोप्रतिरथात्मजः ६ तस्य मेधातिथिस्तस्मात्प्रस्कन्नाद्या द्विजातयः पुत्रोभूत्सुमते रेभिर्दु

धर्मसुश्रूसत्यव्रतेयवः ४ वनेयुश्चावमः स्मृतः एवं दशैते रौद्राश्वस्य पुत्राः जाताः सूत्रा
आमपरमिमप्परस्तुतिपृष्टी समस्तार्थवशवर्तिनेदृष्टांतः जगदात्मनः जगतप्राणस्य मुख्यस्य ...

विंशे ०

देवानामपिमायांवैभवंप्रत्यगात् प्रत्यपेतत्यतः गुहंगुरुंहरिंप्राययौप्राप्तः तद्देशभवबानमायवन्न
इतिपाठेदुर्लभंअत्यन्तसारमायावतोश्रेष्ठः हरिरेवाश्रमविनष्टः २६ मृगानश्रेष्ठगजानुभद्रमशेरह।
गादपेगजजातिभेदः मष्णारइत्यस्यश्रुतिपदस्यव्याख्यानंकर्मणीति कस्मिंश्चित्कर्मविशेषेकाचि
न्मष्णारेतीत्यर्थइतिव्याचष्टे २७ पुरादेवान्जित्वायेसुरारसौकांसिरसातलादिस्थानानिभेजिरेतैः प्रा
णिभिर्देवस्त्रियोरसांतलंनीताःसतीःपुनराहरत् आनिन्यप्राणिभिरन्यैमेनवृष्ट्यादिभिःसहनी

त्रयस्त्रिंशच्छतंह्यश्वान्बद्धाविस्मापयन्नृपान् दौष्मन्तिरत्यगान्मायांदेवानांगुरुमाययौ २६
मृगान्शुक्लदतःकृष्णान्हिरण्येनपरीवृतान् अदात्कर्मणिमष्णारेनियुतानिचतुर्दश २७
भरतस्यमहत्कर्मनपूर्वेनापरेनृपाः नैवापुर्नैवप्राप्स्यन्तिबाहुभ्यांत्रिदिवंयथा २८ किरात
हूणान्यवनानंध्रान्कंकान्खशान्शकान् अ[illegible]ण्यान्नृपांश्चाहन्म्लेच्छान्दिग्विजयेऽखि
लान् २९ जित्वापुरासुरादेवान्येरसौकांसिभेजिरे देवस्त्रियोरसांनीताःप्राणिभिःपुनरा
हरत् ३० सर्वकामान्दुदुहतुःप्रजानांतस्यरोदसी समास्त्रिणवसाहस्रीर्दिक्षुचक्रमवर्त
यत् ३१ ससम्राड्लोकपालाख्यमैश्वर्यमधिराट्श्रि[illegible] चक्रंचास्खलितंप्राणान्मृषे

ताःपूनिवायप्राणिभिरितिपाठेप्राणयोसुरैःतैर्नीताःसतीर्यद्वापणवाहताःतैःदत्तानप्रत्याप्याहरदि
त्यर्थः ३० त्रिनवसाहस्रीःसमाःसप्तविंशतिसहस्राब्दान्चचक्रेसेनाग्रंजाता ३१ तस्यवैराग्यमाह
प्रकारमाह सइतिमृषेतिविचार्यनिवृत्तः नानुरूपमतस्तत्स्थानभवंतीति भर्तारंतिसतिव्याभि
चारशंकयामान्यततीतिभयात्पुत्रान्जघ्नुःमातःपुत्राणांदर्शनेवैसादृश्यानुसंधानेनतत्तनन्।

श्री
भा. नं.
टी.
९२

वितथे च वर्षे सति तिन दशपुत्रार्थं मरुत्सोमेन यागेन यजतः तस्य प्रसन्नाः सन्तो भरद्वाजनामानं पुत्रं मरुत
उपाददुः समर्पयामासुः १७ मरुतो भरद्वाजागमप्रकारं दर्शयन्नाह अन्तर्वत्न्यामिति चतुर्भिः अन्तर्व
त्न्यां गर्भिण्यां भ्रातृजायायां स्वपत्न्यां ममतायां चोचथ्यस्य मिथुनाय कदाचित् प्रवृत्तो बृहस्पतिः तदा हि
तीयगर्भस्यावकाशाभावादाकाशरूपं कं गर्भस्थेन वारितः ततः क्रुद्धो बृहस्पतिरयोग्यो भवेति तं गर्भं
शशाप वीर्यं त्वपि चरत ततो बृहस्पतेः शापाद्गर्भस्थो दीर्घतमा अन्धो बभूव तेन च तत् वीर्यं पादाभिः प्र
हारेणा योनिर्बहिर्निःसारितं समापतितं दृष्ट्वा सद्य एव कुमारोऽभवत् २५ ते च परवीर्यजं भरद्वाजं त्यक्त्वा।

तस्यैवं वितथे वंशे तदर्थं यजतः सुतं मरुत्सोमेन मरुतो भरद्वाजमुपाददुः २४ अन्तर्वत्न्यां
भ्रातृपत्न्यां मैथुनाय बृहस्पतिः प्रवृत्तो वारितो गर्भं शप्त्वा वीर्यमवासृजत् २५ तं त्यक्तुका
मां ममतां भर्तृत्यागविशङ्कितां नामनिर्वचनं तस्य श्लोकमेनं सुरा जगुः २६ मूढ भर
द्वाजमिमं भर द्वाजं बृहस्पते यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयं २७ ॥ राम ॥

गादृशंकितां से तीत्यक्तुकामां ममतां प्रति सुराः एवं बृहस्पतेर्ममतायाश्च विवादरूपं श्लोकं जगुः कि
मर्थं जगुः तत्राह तस्य नाम निरुच्यते येन तं तं नाम विवेने नैव भर्तृत्यागशंकामपाकर्तुमित्यर्थः २६ तत्र
पुत्रं त्यक्तुकामां ममतां बृहस्पतिराह भर्तुर्बिभेषीति चेत्तत्राह द्वाजं एकस्य क्षेत्रे अन्यस्य बीजात्
त्यं द्वाभ्यां जातं अतस्त्वं स्वपुत्रवत् भरस्व इति तस्माद्भय शंकेत्यर्थः एवमुक्ता सती ममता आह हे बृहस्
पते त्वमिमं भरस्व यतः द्वाजं द्वाभ्यामावाभ्यामन्यायतो जातं नाहमेकाकिनी भरामीत्यर्थः यद्यस्मादेव
मुक्त्वा पितरौ ममताबृहस्पती विवदमानौ पुत्रं परित्यज्य यातौ ततो हेतोरस्य भारद्वाज इति पाठोऽतरेय

॥ २ ॥

५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

41A

वितथत्वमभिचारसंभवात्तनमात्मजं वितथं निरर्थकं मत्वा ममतायस्तजन्ततपाजयाद्यतानेर्आक्षिप्तरे
पुरुषमनं भन्तं वीर्याज्जातमेवमृत्यवमात्मजेममताहृत्स्नेन जातेनत्याजेत्यर्थः एवं तथात्मकं महतोः
विस्तृतग्रमिमरुः तदेवं मरुद्भिः प्राज्ञार्पभवत्तस्यान्वयं वितथसंतितदत्तः ३९ इति नवमे नवमे विंशः
एकविंशो न्तेद्यायं तेः स्ततस्यान्वयं उच्यते रंतिदेवाजमीढादयः पवित्रकीर्तिः प्रतन्यते भरतान्वयं वि
तथसंविदत्तत्वाद्वितथसंतोभरद्वाजः सर्ववंशाद्ग्रणिभिर्भरतस्य पुत्रो जातेन इति तद्वंशान्वक्तुं
चोद्यमानाः मरुद्भिरेवं मत्वा वितथमात्मजे अस्तजन्तरुत्तो विंदत्ताय वितथमन्वय ३९ इति
श्रीभागवते नवमस्कंधे विंशोध्यायः २० शुकः वितथस्य सुतान्मन्योर्बृहत्क्षत्रो जयस्ततः
महावीर्यो नरो गर्गः संकृतिस्तु नरात्मजः १ गुरुश्च रंतिदेवश्च संकृतेः पांडुनंद
न रंतिदेवस्य हि यशः इहामुत्र च गीयते २ वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षतः ३
निः किंचनस्य धीरस्य सकुटुंबस्य सीदतः व्यतीयुरष्टचत्वारिंशदहान्यपिबतः किल
घृतपायससंयावं तोयं प्रातरुपस्थिते ४ कृच्छ्रप्राप्तकुटुंबस्य क्षुत्तृड्भ्यां जातवेपथोः अति
थिर्ब्राह्मणः काले भोक्तुकामस्य चागमत तस्मै संव्यभजत्सोन्नमादृत्य श्रद्धयान्वितः
महावीर्य नरो गर्गः पंच पुत्रा बभूवुः २ वियद्वित्तस्य
वियतो गगनादिवायमं वितादेवाउपस्थितमेव वित्तं भोग्यं यस्य यद्वा वियद्व्ययमाप्नुवद्वित्तं भोग्यं
यस्य तदेवाह बुभुक्षतो पिमतो लब्धं दत्तः ३ तत्र पंच वषतितिः किंचनस्यात्दिसाहैः पंच
दशाभिः अपिबतो जलपानमप्यकुर्वतः सूनादित्रयाणां कुटुंबकोनोपच ४ अथान्यान्यपलाति।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ सगणायत्वपृथुसहिता ॥ ९ ॥ उछेषमुच्चरितंएकमेवतर्पयतीतितथा ॥ ११ ॥ परदुःखासहिष्णुतयासर्वेषांदुःखं
भा॰ नं॰ मयैवभोक्तव्यमाशयेनेतिअणिमाद्यष्टसमृद्धियुक्तांगतिमपिमोक्षमपिवाहंनकामये नहिकिंकामयेमनदाह
टी॰ आर्तिमखिलदेहभाजामार्तिदुःखंतेनतद्रूपतांगतःस्थितःसन्नहंप्रपद्येप्राप्नुयामित्येवकामयेयेनतदुःखभा
४२ क्लामयाहंतद्भूतेनतेसर्वेअदुःखाभवंति ॥ १२ ॥ ननुदुःखंकिमितिप्रार्थयसेपरदुःखनिवृत्त्यैवममसर्वदुःखनि

यातेशूद्रेतमन्योगादतिथिःश्वभिरावृतः राजन्मेदीयतामन्नंसगणायवुभुक्षते ॥ ८ ॥ सआहृत्याव
शिष्टंयद्बहुमानपुरस्कृतं तच्चदत्वानमश्चक्रेश्वभ्यःश्वपतयेविभुः ॥ ९ ॥ पानीयमात्रमुच्छेषंतच्चैक
परितर्पणं पास्यतःपुल्कसोभ्यागादपोदेह्यशुभस्यमे ॥ १० ॥ तस्यतांकरुणांवाचंनिशम्यविपु
लश्रमां कृपयाभृशसंतप्तइदमाहामृतंवचः ॥ ११ ॥ नकामयेहंगतिमीश्वरात्परामष्टर्द्धियु
क्तामपुनर्भवंच आर्तिंप्रपद्येखिलदेहभाजामंतःस्थितोयेनभवंत्यदुःखाः ॥ १२ ॥ क्षुत्तृट्श्रमो
गात्रपरिभ्रमश्चदैन्यंक्लमःशोकविषादमोहाः सर्वेनिवृत्ताःकृपणस्यजंतोर्जिजीविषोर्जी
वजलार्पणान्मे ॥ १३ ॥ एवंप्रभाष्यपानीयंम्रियमाणःपिपासया पुल्कसायाददाद्धीरोनिसर्ग
करुणोनृपः ॥ १४ ॥ तस्यत्रिभुवनाधीशाःफलदाःफलमिच्छतां आत्मानंदर्शयांचक्रुर्माया
विष्णुविनिर्मिताः ॥ १५ ॥ सवैतेभ्योनमस्कृत्यनिःसंगोविगतस्पृहः वासुदेवेभगवतिभक्त्याच

हृविरित्याह क्षुत्तृडितिकृपणस्यजंतोर्जीवनहेतोःजलस्यार्पणान्मेसर्वेक्षुत्तृडादयोनिवृत्ताः ॥ १३ ॥ इत्येवं
प्रभाष्य ॥ १४ ॥ त्रिभुवनाधीशाःब्रह्मादयःतदीयधैर्यपरीक्षार्थंप्रथमंमाययावृषलादिरूपेणप्रतीताःसेनइत्य
र्थः ॥ १५ ॥ परंकेवलंवासुदेवेभक्त्यानमश्चक्रेनन्वतान्किमपियाचितवान् ॥ १६ ॥ ॥ राम ॥ ४२

अनन्यराधसः ईश्वरातिरिक्तफलांतरानपेक्षस्य प्रत्यलीयत आत्मन्येवलीनावभूव १७ मन्युसु
तस्य नरस्य वंशमनुक्त्वा तत्सुतस्य गर्गस्य वंशमाह गर्गादिति महावीर्यस्य वंशमाह दुरितक्षयः
तस्य त्रय्यारुणिः कविः पुष्करारुणिश्चेति त्रयः पुत्राः ये अत्र तत्र वंशे ब्राह्मणगतिं ब्राह्मणत्वं प्राप्तो
गतास्ते १९ मन्युपुत्राणां पंचानां मध्ये बृहत्क्षत्रस्य वंशमाह बृहत्क्षत्रस्येति यत्तेयेन हस्तिनापुरं कृतमित्य
र्थः अजमीढद्विमीढपुरुमीढाः हस्तिनः पुत्राः २० अजमीढाद्देवान्मः पुत्रोऽस्य बृहदिषुर्नामाभवत् २१ पार
ईश्वराल्लवनेचितं कृत्वेत्यनन्यराधसः मायागुणमयी राजन्स्वप्नवत्प्रत्यलीयत १७ तत
प्रसंगानुभावेन रंतिदेवानुवर्तिनः अभवन्योगिनः सर्वे नारायणपरायणाः १८ ग
र्गाच्छिनिः ततो गार्ग्यः क्षत्राद्ब्रह्म व्यवर्तत दुरितक्षयो महावीर्यात्तस्य त्रय्यारुणिः क
विः १९ पुष्करारुणिरित्यत्र ये ब्राह्मणगतिं गताः बृहत्क्षत्रस्य पुत्रोऽभूद्धस्ती यद्धस्तिना
पुरे अजमीढो द्विमीढश्च पुरुमीढश्च हस्तिनः अजमीढस्य वंश्याः स्युः प्रियमेधादयो
द्विजाः २० अजमीढाद्बृहदिषुस्तस्य पुत्रो बृहद्धनुः बृहत्कायस्ततस्तस्य पुत्र आसीज्ज
यद्रथः २१ तत्सुतो विशदस्तस्य सेनजित्समजायत रुचिराश्वो दृढहनुः काश्यो वत्स
स्ततनयो नीपः नीपस्य पुत्रशतं २२ स एव कृत्व्यां भार्यायां शुककन्यायां ब्रह्मदत्तं जनयामास त
दुक्तं हरिवंशादिषु पराशरकुलोत्पन्नः शुको नाम महायशाः व्यासादरण्यां संभूतो विधूमोऽग्निरि
व ज्वलन् स तस्यां पितृकन्यायां पीवर्यां जनयिष्यति कृष्णं गौरं प्रभुं शंभुं तथा भूरिश्रुतं जयं कन्यां
कीर्तिमतीं षष्ठीं योगिनीं योगमातरं ब्रह्मदत्तस्य जननीं महिषीं त्वनुहस्य चेति पदेऽपि शुकस्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

43

श्री° स एव योगतंत्रं चकार बार्हदीषो वंश्याः इमेदीर्घतमार्व २५ सुपार्श्वकृत सुपार्श्वस्य पिता २६ प्राच्यसाम्नांष
भा° न° ट्संहिताजमैमीविभज्याध्यापितवान् २७ अजमीढस्य वंश्याः प्रियमेधादयः केचिद्ब्राह्मणा बभूवुः बृहदिषु
टी° जैगीषव्योपदेशेन योगतंत्रं चकार ह उदक्सेनस्ततस्तस्माद्भल्लाटो बार्हदीषवाः २५ यवी
४३ नरो द्विमीढस्य कृतिमांस्तत्सुतः स्मृतः नाम्ना सत्यधृतिस्तस्य दृढनेमिः सुपार्श्वकृत् २६ सुपा
र्श्वात्सुमतिस्तस्य पुत्रः सन्नतिमांस्ततः कृती हिरण्यनाभाद्यो योगं प्राप्य जगौ स्म षट् २७ सं
हिताः प्राच्यसाम्नां वै नीपो ह्युग्रायुधस्ततः तस्य क्षेम्यः सुवीरोऽथ सुवीरस्य रिपुंजयः २८ ततो
बहुरथो नाम पुरुमीढोऽप्रजोऽभवत् नलिन्यामजमीढस्य नीलः शान्तिस्तु तत्सुतः २९ शान्तेः सु
शान्तिस्तत्पुत्रः पुरुजोऽर्कस्ततोऽभवत् भर्म्याश्वस्तनयस्तस्य पंचासन्मुद्गलादयः ३० यवीनरो बृ
हद्विश्वः काम्पिल्लः संजयः सुताः ३१ भर्म्याश्वः प्राह पुत्रा मे पंचानां रक्षणाय हि विषयाणामल
मिमे इति पंचालसंज्ञिताः मुद्गलाद्ब्रह्मनिर्वृत्तं गोत्रं मौद्गल्यसंज्ञितं ३२ मिथुनं मौद्गल्याद्भार्म्या
द्दिवोदासः पुमानभूत् अहल्या कन्यका यस्यां शतानन्दस्तु गौतमात् ३३ तस्य सत्यधृतिः पुत्रो
धनुर्वेदविशारदः शरद्वांस्तत्सुतो यस्मादुर्वशीदर्शनात्किल ३४ शरस्तम्बेऽपतद्रेतो मिथुनं तद
भूच्छुभं तद्दृष्ट्वा कृपयागृह्णाच्छान्तनुर्मृगयां चरन् कृपः कुमारः कन्या च द्रोणपत्न्यभवत्कृ
पी ३५ इति श्रीभागवते नवमस्कंधे एकविंशतितमोऽध्यायः २१ ॥ राम ॥ राम

भृतयः सविद्यास्त्विति वंशद्वयमनुक्रान्तेनैव वंशान्तरमाह नलिन्यामिति यावत्समाप्ति २९ मुद्गलएकः
यवीनरादयश्चत्वारः तैः सह पंच ३० भार्म्यात् भार्म्याश्वपुत्रोऽभूत् मिथुनं वाभूत् तदेवाह दिवोदासः पुमा
नहल्या च कन्यकेति ३३ इति श्रीभावार्थदीपिकायां नवमस्कंधे एकविंशोऽध्यायः ॥ राम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

431

द्वाविंशे तु दिवोदासवंशो ऋक्षाथ वर्णिताः जरासंधपार्थचैद्यो पुनादयः १ तस्य सोमकस्य पुत्राणां शतं बभूव
तेषां जंतुर्ज्येष्ठः पृषतो यवीयान् पृषदः अजमीढस्यैव वंशांतरमाह ऋक्षादिति ततः संवरणात्कुरुः ४ तस्य कृतिवः उपरिचरो
वसुः ततो वसोर्बृहद्रथोऽमात्यविप्राद्विषं थी ५ तानेवाह कुशांबेति ६ तस्मात् पुष्पवान् जज्ञे तस्यापत्यं सत्यहित इति

मुकः मित्रायुश्च दिवोदासात् च्यवनस्ततस्ततोऽस्य सुदासः सहदेवोऽथ सोमको जंतुजन्मकृत् १ त
स्य पुत्रशतं तेषां यवीयान् पृषतः ततः द्रुपदो द्रौपदी तस्य धृष्टद्युम्नादयः सुताः २ धृष्टद्युम्नाद्धृष्टके
तुर्भार्म्याः पंचालका इमे योऽजमीढसुतो ह्यन्यस्त्वृक्षः संवरणस्ततः ३ तपत्यां सूर्यकन्यायां कुरुक्षे
त्रपतिः कुरुः परीक्षित्सुधनुर्जह्नुर्निषधाश्च कुरोः सुताः सुहोत्रोऽभूत्सुधनुषः च्यवनोऽथ ततः कृती ४
वसुस्तस्योपरिचरो बृहद्रथमुखास्ततः कुशांबमत्स्यप्रत्यग्रचेदिपाद्याश्च चेदिपाः ५ बृहद्रथात्
कुशाग्रोऽभूदृषभस्तस्य तत्सुतः जज्ञे सत्यहितोऽपत्यं पुष्पवांस्तत्सुतो पुरुः ६ अन्यस्यां चापि भार्यायां
शकले द्वे बृहद्रथात् ये मात्रा बहिरुत्सृष्टे जरया चाभिसंधिते जीव जीवेति क्रीडंत्या जरासंधोऽभवत्सु
तः ततश्च सहदेवोऽभूत्सोमापिर्यच्छ्रुतश्रवाः परीक्षिदनपत्योऽभूत्सुरथो नाम जाह्नवः ९ ततो विदू
रथस्तस्मात्सार्वभौमस्ततोऽभवत् जयसेनस्तत्तनयो राधिकोऽतोऽयुतोऽन्वभूत् १० ततश्चाक्रोधनस्तस्मा
द्देवातिथिरमुष्य च ऋक्षस्तस्य दिलीपोऽभूत्प्रतीपस्तस्य चात्मजः ११ देवापिः शंतनुस्तस्य बाह्लीक
इति चात्मजाः पितृराज्यं परित्यज्य देवापिस्तु वनं गतः १२ ॥ योऽजे ० जरया रात्मा ८ यद्य स्मात्सोमापेः
श्रुतश्रवाः कुरोः पुत्रः परीक्षित् पत्न्यः जाह्नवः जह्नोः पुत्रः ९ अतो राधिकादयुतो भविष्यत्यः १० तस्य प्रतीपस्य

प्राक्पूर्वजन्मनि महाभिष इति संज्ञा यस्य सः १३ यदा देवो न ववर्ष तदा शंतनुस्तत्र कारणं ब्राह्मणानपृच्छत् १४ ब्राह्म
णास्त्वेवमूचुः दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः इति स्मृतेः योऽग्रभुक् त्व
मग्रजे भवनक्रियस्तत्वाद्यपि परिवेत्तेव भवति अतस्तद्दोषपरिहाराय राज्यमग्रजाय राज्यमग्रजाय देहि ततो वृष्टि
र्भवत्येव १५ मुक्तः शंतनुर्वनं गत्वा ज्येष्ठं छंदयामास राजन्: प्रजापालनादि परो धर्मः अतः त्वं राज्यं स्वीकुर्विति प्रो

अभवच्छंतनू राजा प्राक्महाभिषसंज्ञितः यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः १३ शांतिमाप्नो
ति चैवाग्र्यां कर्मणा तेन शंतनुः समा द्वादश तद्राज्ये न ववर्ष यदा विभुः १४ शंतनुर्ब्राह्मणैरुक्तः परि
वेत्तायमग्रभुक् राज्यं देह्यग्रजायाशु पुरराष्ट्रविवृद्धये १५ एवमुक्तो द्विजैर्ज्येष्ठं छंदयामास सोऽब्रवीत्
तन्मंत्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितो गिरा १६ वेदवादातिवादान्वै तदा देवो ववर्ष ह देवापिर्योगमा
स्थाय कलापग्राममाश्रित सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति बाह्लीकात्सोमदत्तोऽभूद्भूरि
र्भूरिश्रवास्ततः १८ शलश्च शंतनोरासीद्गंगायां भीष्म आत्मवान् सर्वधर्मविदां श्रेष्ठो महाभागव
तः कविः १९ वीरयूथाग्रणीर्येन रामोऽपि युधि तोषितः शंतनोर्दासकन्यायां जज्ञे चित्रांगदः सुतः २०

धितवान् ततः पूर्वमेव तस्य मंत्रिणाश्मरावसंज्ञेन देवापिः पाषंडीकृत्य राज्यानर्हं कर्तुं ये प्रहिता विप्रास्तैः
पाषंडमतानुसारिण्या गिरा वेदाद्विभ्रंशितः स तु वेदवादस्यातिवादान्निंदावचनानि सोऽब्रवीत् १६ ततश्च स्य पा
तित्वेन राज्यानर्हत्वे जाते शंतनोर्दोषाभावाद्देवो ववर्षेत्यर्थः १७ ततः सोमदत्ताद्भूरिर्भूरिश्रवा भूरिः शलश्चेति त्रयः
गंगायामष्टमः दासकन्यायामिति उपरिचरस्य वसोर्वीर्येण मत्स्यगर्भादुत्पन्ना कन्या दासैः कैवर्तैः पालिता अतो ४५

44A

नाम्नातस्यनाम्नाचित्रांगदेनगंधर्वेणप्रवृद्धेनहतः यस्यांसत्यवत्यांशंतनुपरिग्रहात्पूर्वमेव १९ वे
दगुप्तायेनयतोहंज्ञानतः इदंश्रीभागवतंचाध्यगंअधिगतवानस्मि २० स्वयंवराद्वीर्येणबला
दुपानीतेपात्रासत्यवत्याउक्तेइतिशेषयाभावमाह अप्रजस्यपत्युःक्षेत्रेदेवराङ्गरूपप्रयुक्ताज्ञ

विचित्रवीर्यश्चावरजोनाम्नाचित्रांगदोहतः यस्यांपराशरात्साक्षादवतीर्णोहरेःकला २१
वेदगुप्तोमुनिःकृष्णोयतोहमिदमध्यगां हित्वास्वशिष्यान्पैलादीन्भगवान्बादरायणः २२
मह्यंपुत्रायशांतायपरंगुह्यमिदंजगौ विचित्रवीर्योथोवाहकाशिराजसुतेबलात् २३
स्वयंवरादुपानीतेअंबिकांबालिकेउभे तयोरासक्तहृदयोगृहीतोय[illegible]क्ष्मणामृतः २४ क्षे
त्रेप्रजस्यवैभ्रातुर्मात्रोक्तोबादरायणः धृतराष्ट्रंचपांडुंचविदुरंचाप्यजीजनत् २५ गां
धार्यांधृतराष्ट्रस्यजज्ञेपुत्रशतंनृप तत्रदुर्योधनोज्येष्ठोदुःशलाचापिकन्यका २६
शापान्मैथुनरुद्धस्यपांडोःकुंत्यांमहारथाः जाताधर्मानिलेंद्रेभ्योयुधिष्ठिरमुखास्त्रयः २७
नकुलःसहदेवश्चमाद्र्यांनासत्यदस्रयोः द्रौपद्यांपंचपंचभ्यःपुत्रास्तेपितरोभवन् २८
युधिष्ठिरात्प्रतिविंध्यःश्रुतसेनोवृकोदरात् अर्जुनाच्छ्रुतकीर्तिस्तुशतानीकस्तुनाकुलिः
सहदेवसुतोराजन्श्रुतकर्मातथापरे युधिष्ठिरात्तुपौरव्यांदेवकोथघटोत्कचः ३०
भीमसेनाद्धिडिंबायांकाल्यांसर्वगतस्ततः सहदेवात्सुहोत्रंतुविजयासूतपार्वती ३१ क

रेणुमतीयादित्यादिवचलात् २९ दुःशालानामचैककन्यकाजज्ञे २६ अर्जुनेश्मशापापान्मैथुनेरुद्धस्य ३०
नासत्यदस्राभ्यांपूर्वस्यायुधिष्ठिरादिभ्यःपंचाभवन्तथापरेचभार्यांतरेषु ३२ कालीचान्याभीमस्य।
भार्यातस्यां ततोभीमात्सर्वगतोनामपुत्रोभवदित्यर्थः ३१ उलूप्यांनागकन्यायांमणिपूरपतेःसुता

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

45

श्री० भाग० टी० ४५

७

तरसेतंरोहितेकृत्वा ३० भविष्यानाहतस्यपुत्रःश्रुतिपावत्समाप्तिः यावत्कालक्रियायातानेपरंचात्मज्ञा।
नेशौनकात्प्राप्स्यतिश्रस्त्रज्ञानंकृपाचार्यादितिद्रष्टव्यंयाज्ञवल्क्यात्त्रयीमधीत्यकृपादस्त्राण्यवाप्य।

तवतातःसुभद्रायामभिमन्युरजायत सर्वातिरथजिद्वीरउत्तरायांततोभवान ३३ परिक्षी
णेषुकुरुषुद्रौणेर्ब्रह्मास्त्रतेजसः त्वंचकृष्णानुभावेनसजीवोमोचितोंतकात ३४ तवेमे
न तनयाःतातजनमेजयपूर्वकाः श्रुतसेनोभीमसेनउग्रसेनश्चवीर्यवान ३५ जनमेजय।
स्त्वांविदित्वातक्षकान्निधनंगते सर्पान्वैसर्पयागाग्नौसहोष्यतिरुषान्वितः ३६ कावष
तुरं वेयंपुरोधायतुरगमेधयाट् समंतात्पृथिवींसर्वांजित्वायक्ष्यतिचाध्वरैः ३७ तस्यपुत्रःश
तानीकोयाज्ञवल्क्यात्त्रयींपठन अस्त्रज्ञानंक्रियाज्ञानंशौनकात्परमेष्यति ३८ सह
५६ स्रानीकस्तत्सुतः ततःचैवाश्वमेधजः असीमकृष्णस्तस्यापिनेमिचक्रस्तुतत्सुतः ३९
गजाह्वयेहृतेनद्याकौशांब्यांसाधुवत्स्यति उक्तस्ततःचित्ररथःतस्मात्शुचिरथःसुतः
तस्माच्चवृष्टिमांस्तस्यसुषेणोथमहीपतिः सुनीथस्तस्यभवितानृचक्षुर्यत्सुखी
नलः ४१ परिप्लवःसुतस्तस्मान्मेधावीसुनयात्मजः नृपंजयस्ततोदूर्वस्तिमिस्तस्माज्जनि

तिर्वैत्सवोक्तेःकृचित्श्रस्त्रज्ञानेकृपाचार्यादित्येवपाठः ४० यद्यस्मात्सुखीनलःपुत्रः ४१ तस्मात
परिप्लवात्सुनयः तस्मान्मेजोमेधावतीत्यर्थः तस्मात्सुदासःततःशतानीकइत्यर्थः ४२ ॥ रामः॥ ४५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

.45A

दृढरथस्य नामांतरं ततः सहदेवः तस्य मार्जारिः यस्मान्मार्जारिः श्रुतश्रवाः ४५ सहस्रसंवत्सरमेते भाव्या भूपा
लाः ततः परं भाव्यानन् द्वादशस्कंधे वक्ष्यति ४९ इति श्रीभावार्थे नवमे द्वाविंशः २२ त्रयोविंशे नवोऽर्द्धस्यो।

शतानीकाद्दुर्दमनस्तस्यापत्यं महीनरः दंडपाणिर्निमिस्तस्य क्षेमको भविता नृपः ४३ ब्रह्मक्ष
त्रस्य वै योनिर्वंशो देवर्षिसत्कृतः क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ४४ अथ मागध
सुनक्षत्रः ४ राजानो भविता ये वदामि ते भविता सहदेवस्य मार्जारिर्यच्छ्रुतश्रवाः ४५ ततो युतायुस्तस्या
पि निरमित्रोऽथ तत्सुतः सुनक्षत्रात्सुनक्षत्राद्बृहत्सेनोऽथ कर्मजित् ४६ ततः सुतंजयाद्विप्रः शुचिस्तस्य
भविष्यति क्षेमोऽथ सुव्रतस्तस्माद्धर्मसूत्रः समस्ततः ४७ द्युमत्सेनोऽथ सुमतिः सुबलो जनिता ततः
सुनीथः सत्यजिदथ विश्वजिद्यद्रिपुंजयः ४८ बार्हद्रथाश्च भूपाला भाव्याः साहस्रवत्सरं ४९ इति
श्रीभागवते नवमस्कंधे द्वाविंशोऽध्यायः २२ शुक उवाच अनोः सभानरश्चक्षुः परोक्षश्च त्रयः सुताः स
भानरात्कालनरः सृंजयस्तत्सुतस्ततः १ जनमेजयस्तस्य पुत्रो महाशालो महामनाः उशीनरस्
तितिक्षुश्च महामनस आत्मजौ २ शिबिर्वनः शमिर्दक्षश्चत्वारोशीनरात्मजाः वृषादर्भः सुवी
रश्च मद्रः कैकय आत्मजाः ३ शिबेश्चत्वार एवासंस्तितिक्षोश्च रुशद्रथः ततो होमोऽथ सुतपा ब
लिः सुतपसोऽभवत् ४ अंगवंगकलिंगाद्याः सुह्मपुंड्रान्ध्रसंज्ञिताः जज्ञिरे दीर्घतमसो बलेः क्षेत्रे
महीक्षितः ५ चक्रुः स्वनाम्ना विषयान्षडिमान्प्राच्यकांश्च ते खनपानोऽङ्गतो जज्ञे तस्माद्दि
विरथस्ततः ६ सुतो धर्मरथो यस्य जज्ञे चित्ररथोऽप्रजाः रोमपाद इति ख्यातस्तस्मै दशरथः सखा

स्तव शाखानवः क्रमानयदोश्च वंशानुक्रांतो यावयामसंभवः तदेव ययातेः पुत्राणां पंचमस्य पुरोर्वं
शः अनुक्रांतः इदानीं च तुर्वशस्य वंशमवक्रामति अनोरिति निगतेपतेरित्यं ततस्य जनमेजयस्य महामना २

श्री
भाग
टी
५९

सद्रः श्येनः सर्वशो यौरववंशे ६ प्रथमस्य सहस्रजितस्यात्मजः ७ कुंतेः सोहंजः सोहंजेर्महिष्मान महिष्मतो
दैवैर्वर्षनियुतान्यासान्निस्पेंद्रियगोमहते नाट्यसंगीतवादित्रैर्विभ्रमालिंगनादिभिः ८ स्वतराज्ञोऽनप
त्यस्यानिरूप्येष्टिम कृत्ततः प्रजामदात्दशरथो येन लेभेऽप्रजः प्रजाः ९ चतुरंगो रोमपादात्पृथुला
क्षस्ततः सुतः बृहद्रथो बृहत्कर्मा बृहद्भानुश्च तत्सुताः १० आद्याद्बृहन्मनास्तस्माज्जयद्रथ उ
दाहृतः विजयस्तस्य संभूत्यां ततो धृतिरजायत ११ ततो धृतव्रतस्तस्य सत्कर्माधिरथस्ततः यो
ऽसौ गंगातटे क्रीडन्मंजूषांतर्गतं शिशुं १२ कुंत्यापविद्धं कानीनमनपत्योऽकरोत्सुतं ॥
वृषसेनः सुतस्तस्य कर्णस्य जगतीपते १३ द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः आरब्धस्तस्य गां
धारस्तस्य धर्मस्ततो धृत १४ धृतस्य दुर्मदस्तस्मात्प्रचेताः प्राचेतसः शतं म्लेच्छाधिपतयोऽभवन्
उदीचीं दिशमाश्रिताः १५ तुर्वसोश्च सुतो वह्निर्वह्नेर्भर्गोऽथ भानुमान त्रिभानुस्तत्सुतोऽस्या
पि करंधम उदारधीः १६ मरुतः तत्सुतः पुत्रः पौरवमन्वभूत दुष्मन्तः स पुनर्भेजे स्ववंशं राज्य
कामुकः १७ ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशं नरर्षभ वर्णयामि महापुण्यं सर्वपापहरं नृणां १८
यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते यत्रावतीर्णो भगवान्परमात्मा नराकृतिः १९ यदोः सह
स्रजित्क्रोष्टा नलो रिपुरिति विश्रुताः चत्वारः सूनवस्तत्र शतजित्प्रथमात्मजः २० महाहयो
वेणुहयो हैहयश्चेति तत्सुताः धर्मस्तु हैहयसुतो नेत्रः कुन्तेः पिता ततः २१ सोहंजिरभवत्
कुन्तेर्महिष्मान्भद्रसेनकः दुर्मदो भद्रसेनस्य धनकः कृतवीर्यसूः कृताग्निः कृतवर्मा च कृतौ
जाः २२

भद्रसेनकः तस्य दुर्मदो धनकश्चेति द्वौ पुत्रौ कृतवीर्यस्य जनकः कृतवीर्योदयश्चत्वारो धनकस्यात्मजा इत्य ५९

46A

अनिष्टमविनाशं वित्ते पेन तथा विधं सर्वरणं यस्य सः अत्र तंत्र षडिंद्रियविषयं बुभुजे २१ और्वस्य तेन ससागरे।
णा पंसहत्तमित्यर्थः तेषां तालजंघपुत्राणां ज्येष्ठपुत्रस्य मधोः पुत्रशतं वृष्णिज्येष्ठो यस्मिन् यतो मधोर्वृष्णेसु
हृतोः २२ कृतं चतुर्दश महारत्नानि तत्तज्जातिश्रेष्ठानि यस्य सः तानि च मार्कंडेयपुराणे वर्णितानि गजवा

अजेन: कृतवीर्यस्य सप्तद्वीपेश्वरो ऽभवत् दत्तात्रेयाद्धरेरंशात्प्राप्तयोगमहागुणः २३ न नूनं का
र्तवीर्यस्य गतिं यास्यंति पार्थिवाः यज्ञदानतपोयोगश्रुतवीर्यजयादिभिः २४ पंचाशीतिसह
स्राणि ह्यव्याहतबलः समाः अनष्टवित्तस्मरणो बुभुजे ऽक्षय्यषड्वसु २५ तस्य पुत्रसहस्रेषु पं
चैवोर्वरितामृधे जयध्वजः शूरसेनो वृषभो मधुरूर्जितः २६ जयध्वजात्तालजंघस्तस्य पुत्रशतं
त्वभूत् क्षत्रं यत्तालजंघाख्यमौर्वतेजोपसंहृतं २७ तेषां ज्येष्ठो वीतिहोत्रो वृष्णिः पुत्रो मधोः स्मृतः
तस्य पुत्रशतं त्वासीद्वृष्णिज्येष्ठं यतः कुलं २८ माधवा वृष्णयो राजन् यादवाश्चेति संज्ञिताः य
दुपुत्रस्य च क्रोष्टोः पुत्रो वृजिनवांस्ततः २९ स्वाहितो ऽतो रुशेकुर्वै तस्य चित्ररथस्ततः शशबिं
दुर्महायोगी महाभोजो महानभूत् ३० चतुर्दशमहारत्नश्चक्रवर्त्यपराजितः तस्य पत्नीस
हस्राणां दशानां सुमहायशाः ३१ दशलक्षसहस्राणि पुत्राणां तास्वजीजनत् तेषां तु षट्प्रधा
नानां पृथुश्रवस आत्मजः धर्मो नामोशना तस्य हयमेधशतस्य याट् ३२ तत्सुतो रुचकस्तस्य
पंचासन्नात्मजाः शृणु पुरुजित् रुक्म रुक्मेषु पृथुज्यामघसंज्ञिताः ३३ ॥ राम ॥

जिरथस्त्रीषु निपिमात्संतावरडमाः शक्तिप्रापाशमणिहन्त्रविमानानि चतुर्दशेति दर्शिनां पत्नीसहस्रा
णां भार्या पुनस्य प्रत्येकं लक्षलक्ष मित्येवं तासु पुत्राणां दशलक्षसहस्राणि जनयामास पृथुश्रवाः पृथु
कीर्तिः पृथुश्रवा रस्यास्य: षट्प्रधाना श्रेष्ठा येषां तेषां मध्ये ३० पंचग्रामं ज्ञात्मा सनसश्रुणुतानेवाह।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

47

श्री॰ भा॰ टी॰ ९॰

भार्याभयादेवैकभार्यस्य ज्यापतेर्ज्यामघस्यापुत्रस्य तद्वयमेव पुत्रत्वप्रदमभवदिति निदर्शयन्नाह ज्यामघ॰
स्त्विति ३४ यदिमे सपत्नी स्यात्तर्हि स्नुषेयं युज्येतापि नवे तदसतीत्याह असपत्नी चेदि ३५ प्रतिभयत्वा
त्कलत्याह जनयिष्यसीति भार्याभयप्रकंपमानस्वित्रसर्वांगस्य राज्ञस्त्राणसंकटमालोक्यानुकंपि
तास्तेन बहुकालेनापि तावि श्वेदेवाः पितरश्च तथेत्यन्वमोदंत ३० ततश्च देवताप्रसादेन जनयिष्यसी

ज्यामघस्त्वप्रजोप्यन्यां भार्यां शैब्यापतिर्भयात् नाविंदच्छत्रुभवनाद्भोज्यां कन्यामहारषी
त् ३५ रथस्थां तां निरीक्ष्याह शैब्या पतिममर्षिता केयं कुहक मत्स्थानं रथमारोपितेति वै ३६
स्नुषा तवेत्यभिहिते स्मयंती पतिमब्रवीत् अहं वंध्या सपत्नी च स्नुषा मे युज्यते कथं ३७
जनयिष्यसि यं राज्ञि तस्येयमुपयुज्यते अन्वमोदंत तद्विश्वेदेवाः पितर एव च ३८ शैब्या
गर्भमधात्काले कुमारं सुषुवे शुभं स विदर्भ इति प्रोक्त उपयेमे स्नुषां सतीं ३९ इति श्रीभा
गवते नवमस्कंधे त्रयोविंशोध्यायः २३ शुकः तस्यां विदर्भोजनयत्पुत्रौ ना
म्ना कुशक्रथौ तृतीयं रोमपादं च विदर्भकुलनंदनं १ रोमपादसुतो बभ्रुर्बभ्रोः कृति
रजायत उशिकस्तत्सुतस्तस्माच्चेदिश्चैद्यादयो नृपाः २ ॥

तिवृत्तमनुहृतगुणेन च निवृत्तराजस्कापि शैब्या गर्भमधात्तस्य च महिमापराभावादिभिरुक्तः य।
योऽन्वभार्यावशात्तपे केचिद्वैष्णवस्तथ वास्तवाः तेषां ज्यामघः श्रेष्ठः शैब्यापतिरभूत्पति ३८ इ
ति श्रीभावार्थदीपिकायां नवमे त्रयोविंशोध्यायः २३ चतुर्विंशे दर्भस्य पुत्रत्रयसमुद्भवाः वंशानां
नामन्वयाः प्रोक्ता रामकृष्णोद्भवावधि १ चैद्यादयः दमघोषादयः दमघोषादय १ ॥ ४७

वि२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

47-A

ततोदशरथाच्छकुनिः पुराणांतरादेवमाविशेषोद्रष्टव्यः ततःकरुवशाद्रनः २ अनोपुत्रः पुरुहोत्रः
महाभोजश्चन्येवंसप्तमारिषहेत्रायैः ततस्तदुपदेशेनयेनयेपंचषष्टशादिसंख्याः पुरुषाःतेमृतलंबमोक्ष
कृतयस्तकृतेनिम्नपुत्रोभदुरिषितस्याथनिर्वृतिः ततोदशाहेनामाभजतस्यश्यामंततःततः ३
नीमृतोविकृतस्तस्य ... पस्यभीमरथःसुतः ततोनवरथःपुत्रोजातोदशरथस्ततः ४ करंभिः
शकुनेपुत्रोदेवरातस्तदात्मनः देवक्षत्रस्ततस्तस्यमधुःकुरुवशादनः ५ पुरुहोत्रस्ततोःपुत्रः
तस्यायुःसात्वतस्ततः भजमानोभजिदिव्यान्धकवृष्णिर्देवावृधोपंधकः ६ सात्वतस्यसुताःसप्तम
होभोजश्चमारिष भजमानस्यनिम्लोचिः किंकिणोधृष्टिरेवच ७ एकस्यामात्मजःपश्चाम
न्यस्यांचत्रयःसुताः शतजिच्चसहस्रजिदयुतजिदितिप्रभो ८ बभ्रुर्देवावृधसुतःतयोश्लोकौ
पठन्त्यमू यथैवशृणुमोदूरात्संपश्यामःतथांतिकात् ९ बभ्रुःश्रेष्ठोमनुष्याणांदेवैर्देवावृधःसमः
पुरुषाःपंचषष्टिश्चषट्सहस्राणिचाष्टच १० येमृतत्वमनुप्राप्ताबभ्रोर्देवावृधादपि महाभो
जोप्यथमात्माभोजाश्चासंस्तदन्वये ११ वृष्णेःसुमित्रःपुत्रोभूद्युधाजिच्चपरंतप शिनिस्तस्यानमि
त्रश्चनिम्नोभूदनमित्रतः सत्राजितःप्रसेनश्चनिम्नस्याप्यासतुःसुतौ अनमित्रसुतोयोन्यःशिनि
स्तस्याथसत्यकः युयुधानःसात्यकिर्वैजयस्तस्यकुणिस्ततः १२ युगंधरोनमित्रस्यवृष्णिः
पुत्रोपरस्ततः १३ श्वफल्कःचित्ररथश्चैवगांदिन्यांतुश्वफल्कतः अक्रूरप्रमुखाआसन्पु
त्राः तस्ययुधाजितः शिनिरनमित्रश्चसात्यकिःसत्यकस्यपुत्रोयुयुधानःतस्यजयःतस्यकुणिःततः।
कुणिर्युगंधरःअनमित्रस्यवापरःवृष्णिर्नामपुत्रः १४ अक्रूरःप्रमुखःप्रमुखोयेषांअन्तर्गतअन्तर्गुणसं
विज्ञानोबहुव्रीहिः १५ ॥ राम ॥ राम ॥

48

श्री. भाग. टी. ९८

अतोकृतवानितिकृतानद्वादशवर्षाणितिष्यासंगमइति १७ पृथुरेकःविदूरथाद्याश्चान्येचबहवःविदूरथा
माद्याइतिपाठे आद्यशब्देनविदूरथोपुत्रस्ततश्शूरोविदूरथाद्देसीनिदितिवक्ष्यमाणनिर्देशात
पतिः १८ अक्रूरादयस्तुत्वारीपकस्यसुताइतिनेयं तथाचपराशरःअक्रूरभजमानस्तुचिकेवल

आसंगासारमेयश्चमृदुरोमृदुविद्गिरिः धर्मवृद्धःसुकर्माचक्षेत्रोपेक्षोरिमर्दनः १६ शत्रु
घ्नोगंधमादश्चप्रतिबाहुश्चद्वादश तेषांस्वसासुचाराख्याद्वावक्रूरसुतावपि १७ देववानु
पदेवश्चतथाचित्ररथात्मजः पृथुर्विदूरथाद्याश्चबहवोवृष्णिनंदनः १८ कुकुरोभजमा
नःशुचिःकंबलबर्हिषः कुकुरस्यसुतोवह्निर्विलोमातनयस्ततः १९ कपोतरोमा
तस्यानुःसखायस्यचतुंबुरुः अंधकाद्दुंदुभिस्तस्मादविद्योतःपुनर्वसुः २० तस्याहुकश्चा
हुकीचकन्याचैवाहुकात्मजौ देवकश्चोग्रसेनश्चचत्वारोदेवकात्मजाः २१ देववा
नुपदेवश्चसुदेवोदेववर्धनः तेषांस्वसारःसप्तासन्धृतदेवादयोनृप २२ शांतिदेवो
पदेवाचैवसदेवावाहताः २३ कंसःसुनामान्यग्रोधःकंकःशंकुःसुहूस्तथा राष्ट्रपा
लोथसृष्टिश्चतुष्टिमानौग्रसेनयः २४ कंसाकंसवतीकंकाशूरभूराष्ट्रपालिका उग्रसे

२ श्रीदेवादेवरक्षिता सहदेवादेवकीच २३

वर्हिषस्तथोपिकस्यपुत्राइति १९ अतोरंधकग्रंथकाद्दुन्दुभिरित्यपितद्वचनादेवज्ञेयं २० धृतदेवाद्या
दिर्देवकाद्याः शांतिदेवानाम्नोसप्तसुताः औग्रसेनयःउग्रसेनस्यकन्यकाः २४ वसुदेवस्यानुजादे

॥ २५ ॥ नदुहितरोवसुदेवानुजस्त्रियः

॥ २५ ॥ वसुदेवस्यानुजानांस्त्रियः ९८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

4817

द्वितीयस्य भजमानस्याह भजमानाच्च विदूरथः पुत्रोऽभवत् विदूरथाच्च शूर इति पराशरादिवच
नात् पद्माश्रयु विडूरथघाद्यूतिशर्वीत्काचित्तस्यात्मजाद्विदूरथात् देवमीढस्य यः शूरो नाम
पुत्रः तस्य देवमीढो हृदीकस्य वस्तुतः यथाह पराशरः तस्यापि कृतवर्मा शतधन्वा देवमीढुषाद्याः
पुत्रा बभूवुः देवमीढस्य शूरस्यापि मारिषा नाम पत्न्यभवत् २० तस्यां चासौ दश पुत्रान्

शूरो विदूरथादासीद्भजमानः सुतस्ततः शिनिस्तस्मात्स्वयं भोजो हृदीकस्तत्सुतो म
तः २१ देवबाहुः शतधनुः कृतवर्मेति तत्सुताः देवमीढस्य शूरस्य मारिषा नाम पत्न्य
भूत् २२ तस्यां स जनयामास दश पुत्रानकल्मषान् वसुदेवं देवभागं देवश्रवसमान
कं २३ सृंजयं श्यामकं कंकं शमीकं वत्सकं वृकं देवदुंदुभयो नेदुरानका यस्य जन्मनि
पृथा च श्रुतदेवा च श्रुतकीर्तिः श्रुतश्रवा राजाधिदेवी चैतेषां भगिन्यः पंच कन्यकाः
कुंतेः सख्युः पिता शूरो ह्यपुत्रस्य पृथामदात् सापदुर्वाससो विद्यां देवहूतीं प्रतोषितात्
तस्या वीर्यपरीक्षार्थमाजुहाव रविं शुचिः तदेवोपागतं देवं वीक्ष्य विस्मितमानसा प्र
त्ययार्थं प्रयुक्ता मे याहि देव क्षमस्व मे अमोघं दर्शनं देवि आधत्ते त्वयि चात्मजं योनि

अनन्तरं वसुदेवश्वीतितिआनकाश्च नेदुः हरेः प्रादुर्भावस्थानत्वात् २४ पृथायाः कन्या
कावस्थायां कर्णोत्पत्तिप्रकारमाह कुंतेरिति पंचभिः कदाचिद्गृहमागते दुर्वाससे पृथा
परिचर्यादिना तोषयामास ततः च सा तस्मा देवहूतिं देवाह्वानहेतुविद्यामवाप तद्दत्तापेति
देवमुपागतं वीक्ष्य सा प्राह प्रत्ययार्थं परीक्षार्थं मया विद्या प्रयुक्ता तत एव या किंचित्कार्यमित्य

र्यथा न दुष्येत कर्ताहं ते सुमध्यमे

मे २४ इति तस्यां स आधाय गर्भं
सूर्यो दिवं गतः सद्यः कुमारः संजज्ञे द्वितीय इव भास्करः २५ ॥

वसुदेवं हरेः स्थानं वदंत्यानकदुंदुभिं ४

मित्युक्तो गतो याहीत्येवमुक्तो रविरुवाच २३ अमोघं देवद
र्शनमिति काहं इति चेत्तत्राह तथा योनिर्न दुष्येत तथाहं कर्ता क
रिष्योति २४ ॥

49

यावंत्यौ विंदानुविंदौ ३५ तद्देवं वसुदेवस्य भगिनीनां पतीन्सुतांश्चान्सुक्रांतज्ञातॄणां नवानां पती
तेषां त्यजन्नदीनोयंक्तः क्रालोकस्य विभूती प्रपितामहस्तस्य वाहृपांडवे सत्यविक्रमः ३६
श्रुतदेवां तु कारूषो वृद्धशर्मा समग्रहीत् यस्यामभूद्दंतवक्र ऋषिशप्तो दितेः सुतः ३७
कैकेयो धृष्टकेतुश्च श्रुतकीर्तिमविंदत संतर्दनादयस्तस्यां पंचासन्कैकयाः सुताः ३८
राजाधिदेव्यामावंत्यौ जयसेनोजनिष्ट ह दमघोषश्चेदिराजः श्रुतश्रवसमग्रहीत् ३९
शिशुपालः सुतस्तस्याः कथितस्तस्य संभवः देवभागस्य कंसायां चित्रकेतुबृहद्ब
लौ ४० कंसवत्यां देवश्रवसः सुवीर इषुमांस्तथा कंकायामानकाज्जातः सत्यजि
त्पुरुजित्तथा ४१ सृंजयो राष्ट्रपाल्यां च वृषदुर्मर्षणादिकान् हरिकेशहिरण्या
क्षौ शूरभूम्यां च श्यामकः ४२ मिश्रकेश्यामप्सरसि वृकादीन्वत्सकस्तथा तक्षपु
ष्करशालादीन्दुर्वाक्ष्यां वृक आदधे ४३ सुमित्रार्जुनपालादीन्समीकात्तु सु
दामिनी आनकः कर्णिकायां वै ऋतधामजयावपि ४४ पौरवी रोहिणी भद्रा मदि
रा रोचना इला देवकीप्रमुखाश्चासन्पत्न्य आनकदुंदुभेः ४५ बलं गदं सारणं च दु
र्मदं विपुलं ध्रुवं वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ४६ सुभद्रो भद्रबाहुश्च दु
र्मदो भद्र एव च पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन् ४७ नंदोपनंदकृतकशूरा
द्या मदिरात्मजाः कौशल्या केशिनं त्वेकं प्रसूत कुलनंदनं ४८ इलायामुरुवल्कादी
न्यदुमुख्यानजीजनत् देवभागस्येति नवभिः श्लोकार्थैः ४० पौरवीत्येकादशभिः ४५ कौशल्यामहा ५०

५९

रोचनायामतो जाता हस्तहेमांगदादयः २९

तस्मात्सर्वेणैव प्रमुदिता गन्तरमेवमेतन्निहतः परिश्रमो मम ॥ पौरवाणां चैतेनोन्नयं पौरस्यनेयतो मन्येनमसः त्व
यि रममानास्त्वं हेतोरागमनमन्नननयावयि ॥ विश्वामित्रस्यात्मजाहं मेनकायां जाताना वयाचसर्गगच्छन्त्या
वने काश्यपेनाराजन कन्येवाहमित्यर्थः ॥ किं करवाम त्याह्निवाकान्ततदभिप्रायज्ञानादुपपन्नमिति
वभाषे तावगारोहाभिटः कृतिपर्येर्हितः तद्दर्शनप्रमुदितः सेनिस्तपरिश्रमः पप्रच्छ का।
मुनेतन्नः पद्मसनेत्रसत्याप्यागिरा ॥ कालेकमलपत्राक्षि कस्यासि हृदयंगमे किंवा विकी
र्षितं तत्र भवत्या निर्जनेवने ॥ एवमुक्ते राजन्यनन्तया वयहरुतावनम्यमे नहिवेतः पौरवा।
णामधर्मेरमते कृते ॥ शकुन्तलोवाच विश्वामित्रात्मजैवाहं मेनकामेनकयावने वदे
तद्भवान्क एवा वीर किं करवामते ॥ आस्यतां स्वागतं विदातव्यतामहे ण्वनः भुज्यतां
मेतिनीवारा उम्भेनायदिशोचने ॥ दुष्यन्त उवाच उपपन्नमिदं सत्र सुज्ञानायाः कौशिकान्व
ये स्वयं हि वृणु ते राजा कन्यकामसदृशांवरे ॥ अभिन्युक्ते पश्यपममपयेमशाकुन्तले
गान्धर्वेविधिना राजा देशकालविधानवित ॥ अमोघवीर्यो राजर्षिमहिष्यावीर्यमाद
ये स्पाभनसपुरयातः कालेनासूतसासुते ॥ क एवः कुमारस्यवनेचक्रे सम्मुविताः क्रि
याः वर्द्धामसेगैइ जारासा कौइतिसमसवालकः ॥ तेदुरत्ययविक्रान्तमादाय प्रमदोत्तमा
हरेंपांसामभूतेभर्तुरन्तिकमागमत ॥ यदानजग्रहेराजा भार्यापुत्राववनिंदितो स्पूएव
गान्धर्वेविधिनाविधः समयपूर्वमेकेन ॥ दुरात्मयेविक्रान्तेविक्रमं यम ॥ भजावमपात्रेन तद्दृत्मा
नामापापपात्रे पितेवनपुत्रः नत्रद्देतः येनेति आन्मावैपुत्रनामासीति श्रुतेः भरस्वपुत्रानांश्रवेनेनम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰
भा॰ न॰
टी॰
५॰

किंचरेतोधाःरेतःसेक्ता वै शाश्वतपुत्रोपमत्यपास्त्यितरंनपतिंनाम्यनिपुंनाम्नोनरकाद्यस्मात्त्रायतेसु
तः तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति पाठान्तरे मातापित्रोः पुत्रेप्रतिविवादयमतपाद्धर्मेनिर्णि
तः यमस्य सभायाः सकाशाद्रेतोधा रेतःसेक्ता पितैव धर्मेण विनिन्य पुत्रेनयातितनुमानत्वर्थः ततश्च
भार्यापुत्रासीकृतनवानितितेषु २१ चक्रवर्तीनिव भवेतिशेषः तस्यमहिमागीयतेतदृष्ट्वेतश्लोकाश्च
भिर्गीतानुत्याहिवहूचप्रस्त्याहरेरंशभुवः प्रशाजानस्य २२ तत्रलिंगमाहचक्रमिति २३ गंगायामनु
लोमेषुचपंचाशता वाजिभिरीजेपुरोधायपुरोहितंकृत्वायमुनायाश्चानुलोमेप्रष्टादशसप्ततिमध्या
रेतोधाः पुत्रानयतितनुदेवयमसदनात तंचास्यपातालगर्भेस्यसत्यमाहूशान्तरेतला २१ पिता
पुत्रस्वेभावचक्रवर्तीमहायशाः महिमागीयतेतस्यहरेरंशभुवोभुवि २२ चक्रंदक्षिणमाहस्ते
स्यपद्मकोशोस्यपादयोः ईजेमहाभिषेकेणसोभिषिक्तोधिराड्विभुः २३ पंचपंचाशतामेध्य
र्गंगायामनुवाजिभिः मामतेयंपुरोधायसमुनायामनुप्रभुः २४ अष्टसप्ततिमेध्याश्वान्
ववंधप्रददद्वसु २५ भरतस्याहितोग्नेस्तनामिः साचीगुणविन्तः सहस्रंवद्वशोयस्मिन्ब्राह्मणा
नस्नातवध्वेपंक्तिकरूबैनसयतनेप्रकर्षेणास्टत २६ साचीगुणेमक्रष्णसारंगावनेदेशेमिश्रितामृतएभिसि
त्रग्निचयनेदेशेवासहस्रंब्राह्मणानोभरतेनभूरिदानेनदत्तागाः वद्वशः प्रत्येकंवद्धंवद्धंविभजितेवि
भज्यतत्नद्वः चतुरशीतिप्रापिकस्यपादशासहस्रेकेकंवद्धंभवेतितथाहिहिरण्येनपरिवृतान्तकृष्णा
नशुक्लदतोमृगान मष्णारेभरतोददात शान्तेवद्वानिसप्तवेति तत्रत्याकानिसप्तापिकाशतेवद्वानिश्री
मुकेनानरश्लोकचतुर्दशलक्षणेनसंगृहीतानिप्रदानकर्माणिमप्णारेतियुनातिचकंश्लोकेहि एवंचतुर्दश
लक्षाणांसप्तापिकशतभागोवद्धमिस्युक्तंभवतिरूपंववमत्याश्लोकनसंगृहीतेचतुर्दशानांलक्षाणा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

50A

यृश्नस्तुनयमेवासीत ननकर्मादीनांदेहनना ताभ्यांजाननोवायतोसौहरिः ५५ तदेवोपपादय।
देतित्रिभिः ५६ इत्यस्यमायानियंतः परस्यप्रसंगस्यद्रष्टुः साक्षिणः आत्मनेसर्वगस्यनरोवभक्तः
स्वमायांविनाजन्मनः कर्मणोवाहेतुर्भवतीत्यर्थः किंचयस्यमायाचेष्टितंपुंसोमानजीवानु
ग्रहलम्यसर्वजीवानग्रहकस्यकृतः कर्मादिपारतंत्र्येणजन्मान्मादिसंभवः अनुग्रहमेवाहदे

देवकीतिनयालब्धानवचात्रगदादयः वसुदेवसुतानशावादयेमहदेवया ५२ श्रुत
विश्रुतस्रुग्योत्तमातांडुमोवसन्तिव वसुदेवसदेवकयामहषुत्रानजीजनत ५३
कीर्तिमंतसुषेणंचभद्रसेनमुदारधीः ऋजुंसंमर्दनंभद्रंसंकर्षणमथीश्वरं ५४ अष्टम
स्तुतयोरासीत्स्वयमेवहरिःकिल सुभद्राचमहाभागातवराजन्पितामही ५५ य
दायदेहधर्मस्यत्याव्हिज्रुपायमनः तदातुभगवानीशआत्मानंसृजतिहरिः ५६
नह्यस्यजन्मनोहेतुःकर्मणोवामहीपते आत्ममायांविनेशस्यपरस्यद्रष्टुरात्मनः ५७
यन्मायाचेष्टितंपुंसःस्थित्युत्पत्त्यप्ययायहि अनुग्रहस्तन्निवृत्तेरात्मलाभायचेष्य
ते ५८ अक्षौहिणीनांपतिभिरसुरैर्नृपलांछनैः भुवआक्रम्यमानानामभारायक
तोद्यमः ५९ कर्माण्यपरिमेयाणिमनसापिसुरेश्वरैः सहसंकर्षणश्चक्रेभगवान
यस्माद्देवस्थित्यादयःपुंसःक्रियन्ते प्रलयेलीनोपाधिजीवस्यपर्मोपसंभवाडुपाधिसृष्ट्यादिनायर्मो
दिसंपादनेनात्वग्रहः तथात्मलाभायमोक्षायचक्रियन्तेतवेहवः तेनेवश्रूयमाणेनतस्यापिस्थित्या
देनिवृत्तेः ५८ नस्याचेष्टितंभोमरनुग्रहरूपाह अक्षौहिणीनामितिद्वाभ्यांअभारायभारपरी

51

श्री सेकल्पमात्रेणाम्भभावहरणासमर्थस्यापिकर्मकरणीयशोविलासहासभक्तानुग्रहार्थमित्याह कला
भा न विनिहाभ्यांदुःखशोकतमोस्मिन्दत्तीतितथानद्यशःव्यतेनोतयस्मिन्सत्तोकर्णपीयूषेयशोरूप
टी तीर्थवरेश्रोत्रमेवांजलिःपानसाधनंयस्यसःपुरुषस्तुद्यपिउपस्पृश्यआचमनमात्रेणत्वानसौ
५. दयोःकृपितःकर्मवासनांप्रवर्तते ५३ नदेवाहद्वाभ्यांभोजादपिभिःश्लाघनीकयमीहितंयस्यस।

कलौजनिष्यमाणानांदुःखशोकतमोनुदं अनुग्रहायभक्तानांसुपुण्यंव्यतनोद्यशः ५१
यस्मिन्सत्कर्णपीयूषेयशस्तीर्थवरेसकृत श्रोत्रांजलिरुपस्पृश्यधुनुतेकर्मवासनां ५२
भोजवृष्ण्यंधकमधुशूरसेनदशार्हकैः श्लाघनीयेहितःशश्वत्कुरुसृंजयपांडुभिः ५३
स्निग्धस्मितेक्षितोदारैर्वाक्यैर्विक्रमलीलया नृलोकंरमयामासमूर्त्या
सर्वांगरम्यया ५४ यस्याननंमकरकुंडलचारुकर्णभ्राजत्कपो
लसुभगंसविलासहासं नित्योत्सवंनततृपुर्दृशिभिः
पिवंत्योनार्योनराश्चमुदिताःकुपितानिमेश्च ५५

सर्वांगरम्ययामूर्त्याच ५४ तत्रप्रदर्शनार्थंमुखशोभामाहयस्याननंदृग्भिर्नेत्रैःपिबंत्योनरा
श्चननततृपुःनतृप्ताःनिमेषोन्मेषमात्रव्यवधानमप्यसहमानास्तत्कर्तृनिमेःकुपिताश्चवभूवुः
कथंभूतमाननंमकरकुंडलाभ्यांचारुकर्णौभ्राजंतौकपोलौचयेनसुभगंसविलासहासंयस्मिन
नित्यमुत्सवोयस्मिन ५५ ॥ राम राम राम ॥ ५.

52

श्री श्रीकृष्णवसितं समासेनोपवर्णयति जातइति द्वाभ्यां जातो निजेन रूपेण पश्चान्मनुष्याकारः सन्
भाव व्रजं गतः व्रजवासिनामेधितार्थो येन तेषु सुतानां शतानामुत्पाद्य आत्मनिगमं स्वकीयं वेदमार्गं प्र·
टी ५२

जातोगतः पितृगृहाद्व्रजमेधितार्थो हत्वा रिपून्सुत
शतानि कृतोरुदारः उत्पाद्य तेषु पुरुषः क्रतु ६६
भिः समीजे आत्मानमात्मनिगमं प्रथयन् जनेषु
पृथ्व्याः स वै गुरुभरं क्षपयन् कुरूणामंतः समुत्थ·
कलिना युधि भूपचम्वः दृष्ट्या विधूय विजये ज
यमुद्विघोष्य प्रोच्योद्धवाय च परं समगात्स्वधाम ६७
इति श्रीभागवते नवमस्कंधे यदुवंशचरिते चतुर्विं
शोऽध्यायः २४ समाप्तम्

तः समुत्थेन कलिना निमित्तेन गुरुभरं क्षपयन् दृष्ट्यैव भूपचमूर्विधूय विजये जयं अर्जुनेन जितमि· राम·
त्येवमुद्घोष्य हत्वा परं तत्त्वमुद्धवायोपदिश्य स्वधाम सम्यक्तेनैव रूपेणाजगामेति ६७ इति श्रीभावा ५२
र्थदीपिकायां नवमस्कंधे चतुर्विंशः २४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नवनसमाप्तिः पत्र ५१ ध्याय २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative